नामांक

No. of Questions – 25

No. of Printed Pages – 8

# UP-71-Sanskritam (T.L.)

## प्रारम्भिक शिक्षा पूर्णता प्रमाण-पत्र परीक्षा, 2019

## कक्षा – 8

## तृतीय भाषा – संस्कृतम्

समय : 2.30 होरा ] [ पूर्णाङ्का : 80

परीक्षार्थिभ्यः सामान्यनिर्देशाः

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्काः अनिवार्यतः लेखनीयः ।

(परीक्षार्थी सर्वप्रथम अपने प्रश्न-पत्र पर नामांक अनिवार्य लिखें ।)

(2) सर्वे प्रश्नाः अनिवार्याः ।

(सभी प्रश्न हल करने अनिवार्य हैं ।)

(3) सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेखनीयानि ।

(सभी प्रश्नों के उत्तर दी गई उत्तर पुस्तिका में ही लिखें ।)

(4) एकस्य प्रश्नस्य सर्वेषां भागानाम् उत्तराणि एकत्र एव लेखनीयानि ।

(एक प्रश्न के सभी प्रश्नों के उत्तर एकसाथ ही लिखें)

(5) प्रश्नक्रमांकः एकतः अष्टौ यावत् बहुविकल्पीय प्रश्नानाम् उत्तराणि सूचीं निर्माय एकत्र उत्तरपुस्तिकायामेव लेखनीयानि ।

(प्रश्न संख्या 1 से 8 तक बहुविकल्पीय प्रश्नों के उत्तर उत्तरतालिका बनाकर एकसाथ उत्तर पुस्तिका में ही लिखें ।)

1. एकतः राज्ञीं प्रति <u>अनुरक्तिः</u> अपरतश्च क्षत्रियधर्मः । रेखांकित पदे उपसर्गोऽस्ति । 1

(क) उप
(ख) अनु
(ग) अव
(घ) आ

2. अधोलिखितपदेषु 'तुमुन्' प्रत्यययुक्तं पदम् अस्ति । 1

(क) गतवान्
(ख) ज्ञातवान्
(ग) लिखितः
(घ) पठितुम्

3. जलम् ________ जीवनम् अस्ति । रिक्तस्थाने उचितम् अव्ययं लिखत । 1

(क) एव
(ख) कुत्र
(ग) यदा
(घ) च

4. मित्र ! एषः आत्मनि कुटिलः अस्ति । अस्मिन् वाक्ये सर्वनामपदम् अस्ति । 1

(क) मित्र !
(ख) एषः
(ग) कुटिलः
(घ) अस्ति

5. ईश्वरः साधूनां युगे युगे सम्भवति । 1

(क) विनाशाय
(ख) परित्राणाय
(ग) पठनाय
(घ) अधर्माय

6. राजस्थानस्य ताजमहलरूपेण प्रसिद्धं स्थानम् अस्ति । 1

(क) जसवन्तथडा
(ख) मेहरानगढ़ दुर्गः
(ग) प्रतापगौरव केन्द्रम्
(घ) सोनार दुर्गः

7. या _______ वरदण्डमण्डिकरा । रिक्त स्थानं पूरयत । 1

(क) इन्दुः (ख) तुषारः

(ग) कुन्दम् (घ) वीणा

8. नन्दीवृषभः वाहनम् अस्ति – 1

(क) शिवस्य (ख) विष्णोः

(ग) गणेशस्य (घ) श्रीकृष्णस्य

9. निर्देशानुसारं क्रियापदं लिखत – 1 + 1 = 2

(क) "पा" धातु – लट्लकार – प्रथमपुरुष – बहुवचनम्

(ख) "लभ्" धातु – लट्लकार – प्रथमपुरुष – एकवचनम्

10. सन्धि–विच्छेदं कुरुत :- सूर्योदयः = _________ + _________ 1

सन्धिं कुरुत :- सदा + एव = _________ 1

11. अधोलिखितपदयोः प्रयोगेण एकैकं वाक्यं लिखत – 1 + 1 = 2

(क) नमः

(ख) विना

12. अरावली विश्वस्य प्राचीनतमा पर्वतमाला अस्ति । 2

अत्र रेखांकितपदयोः विशेषणं विशेष्यं च पदं पृथक्कुरुत ।

13. उचित – शब्देन सह मेलनं कुरुत – ½ × 4 = 2

| | |
|---|---|
| (क) ऋतवः | (अ) द्वौ |
| (ख) पक्षौ | (ब) पञ्चदश |
| (ग) तिथयः | (स) सप्तविंशतिः |
| (घ) नक्षत्राणि | (द) षट् |

14. रेखांकितपदानां स्थाने कोष्ठके लिखितानि पदानि चित्वा प्रश्ननिर्माणं कुरुत –

(क) <u>सर्वकारः</u> आर्थिकं सहयोगं करोति । (कः /किम्) 1

(ख) <u>अस्मिन्</u> पाठे दीनबन्धुः विवेकानन्दः अस्ति । (कस्याम्/कस्मिन्) 1

15. कोष्ठके दत्तानि संज्ञापदानि चित्वा रिक्तस्थानानि पूरयत – 1 × 4 = 4

(क) रावरत्नसिंहः _______ शस्त्राणि धारयित्वा प्राचलत् । (स्कन्धं/स्कन्धे)

(ख) दशरथः _______ पिता अस्ति । (रामस्य / रामाय)

(ग) रामकृष्णस्य _______ अश्रुधारा वहति । (नेत्रस्य / नेत्राभ्याम्)

(घ) _______ सूर्यः अस्तं गन्तुम् इच्छति । (मेदपाटाय/मेदपाटस्य)

16. अधोलिखितप्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत – 1 × 4 = 4

(क) अस्माकं देशे किम् अभियानम् प्रचलति ?

(ख) कुँवरप्रतापस्य पितुः नाम किम् ?

(ग) वयं सर्वे कस्य वरद्पुत्राः ?

(घ) अश्वारूढः कः अस्ति ?

17. अधोलिखितप्रश्नानाम् उत्तराणि एकपदेन लिखत – 1 × 4 = 4

(क) उदयकाले सवितुः वर्णः कीदृशः ?

(ख) कस्मात् भवति सम्मोहः ?

(ग) स्वर्गादपि का गरीयसी ?

(घ) सरस्वती कैः देवैः वन्दिता ?

18. अधोलिखित-पदानि चित्वा गीतस्य पूर्तिं कुरुत – 1 × 4 = 4

(देवीस्वरूपा, सिद्धवनम्, श्रीरामाः, चन्दनमस्मिन्)

मृदपि च _______ देशे, ग्रामो ग्रामः _______ ।

यत्र च बाला _______, बालाः सर्वे _______ ।।

19. सुमेलनं कुरुत – 1 × 4 = 4

| (क) | (ख) |
|---|---|
| (क) न हि ज्ञानेन | (1) ज्ञानम् |
| (ख) भावसंशुद्धिरित्येतत्तपो | (2) मौनमात्मविनिग्रहः |
| (ग) मनः प्रसादः सौम्यत्वं | (3) सदृशं पवित्रम् |
| (घ) श्रद्धावाँल्लभते | (4) मानसमुच्यते |

20. चित्रं दृष्ट्वा मञ्जूषातः पदानि च प्रयुज्य चत्वारि वाक्यानि लिखत – 4

(खगाः, विकसन्ति, उदेति, कमलानि, सूर्यः, बालाः कूजन्ति क्रीडन्ति)




अथवा

मंजूषायां लिखितानां शब्दानां सहाय्येन कथां लिखत –

(जलार्थं, पिबामि, स्वल्पम्, प्रस्तरखण्डान्, काकः, जल, घट, उपरि) ½ × 8 = 4

एकः ______ अस्ति । सः बहुतृषितः सः ______ भ्रमति । तदा ग्रीष्मकालः कुत्रापि ______ नास्ति । काकः बहुदूरं गच्छति । तत्र सः एकं ______ पश्यति । काकस्य अतीव सन्तोषः भवति किन्तु घटे ______ एव जलम् अस्ति । जलं कथं ______ ? इति काकः चिन्तयति । सः एकम् उपायं करोति । ______ आनयति । घटे पूरयति । जलम् ______ आगच्छति । काकः सन्तोषेण जलं पिबति ततः गच्छति ।

21. अधोलिखित–वाक्यानां क्रमायोजनं कुरुत – 4

(1) एकदा महाराजः निद्रां कुर्वन् आसीत् ।

(2) कस्यचित् महाराजस्य राजभवने एकः वानरः सेवकः आसीत् ।

(3) वानरः कुपितः सन् खड्गेन मक्षिकायाः उपरि प्रहारं कृतवान् ।

(4) मूर्खेण वानरेण महाराजः मारितः ।

(5) तदा महाराजस्य नासिकायाम् एका मक्षिका उपविष्टा ।

22. अधोलिखितस्य पद्यस्य हिन्दीभाषायां भावार्थः लेख्यः । 8

गच्छन् पिपीलिको याति योजनानां शतान्यपि ।
अगच्छन् वैनतेयोऽपि, पदमेकं न गच्छति ।।

**अथवा**

तृणं खादति केदारे, जलं पिबति पल्वले ।
दुग्धं यच्छति लोकेभ्यः, धेनुर्नो जननी प्रिया ।।

23. 'कर्तव्यपालनम्' अथवा 'संहतिः श्रेयसी पुंसाम्' कथासारं हिन्दीभाषायां लिखत । 8

24. निर्देशानुसारं पदानि स्वीकृत्य "पुस्तकालयः" निबंध-लेखनम् कुरुत –

(विद्यालये, सार्वजनिकस्थाने, पुस्तकालयः जनाः दैनिक समाचारपत्राणि, विविध-विषयानाम् पुस्तकानि) 8

**अथवा**

*रिक्तस्थानानि पूरयित्वा प्रार्थनापत्रं लिखत :-*

(माम्, अष्टकक्षायाः, विद्यालयम्, भगिन्याः, शक्नोमि, प्राथमिक, अशोकः) 8

सेवायाम्

प्रधानाध्यापक महोदयाः

राजकीय उच्च _______ विद्यालयः,

कुरुक्षेत्रम् ।

महोदयाः,

विनम्रनिवेदनम् अस्ति यत् अहम् _______ छात्रः अस्मि । मम _______ विवाहः अस्ति । अहम् _______ आगन्तुं न _______ । अतः दिनत्रयस्य अवकाशं स्वीकृत्य _______ अनुगृहणन्तु ।

दिनांक : _________ भवदीयः शिष्यः

_________

25. अधोलिखितं गद्यांशं पठित्वा प्रश्नानामुत्तराणि संस्कृतभाषायां लिखत – 8

संस्कृतभाषा अस्माकं देशस्य प्राचीनतमा भाषा अस्ति । प्राचीनकाले सर्वे भारतीयाः संस्कृतभाषायाम् एव व्यवहारं कुर्वन्ति स्म । कालान्तरे विविधाः प्रान्तीयाः भाषाः प्रचलिताः अभवन् किन्तु संस्कृतस्य महत्त्वम् अद्यापि अक्षुण्णं वर्तते । सर्वे प्राचीनग्रन्थाः चत्वारो वेदाश्च संस्कृतभाषायामेव सन्ति । संस्कृतभाषा भारतराष्ट्रस्य एकतायाः आधारः अस्ति ।

(क) उपर्युक्तगद्यांशस्य उचितं शीर्षकं लिखत ।

(ख) अस्माकम् देशस्य प्राचीनतमा भाषा का ?

(ग) कति वेदाः सन्ति ?

(घ) संस्कृतभाषायां व्यवहारं कदा कुर्वन्ति स्म